# गाहाजुअलस्तुतिः जिनप्रभसूरिकृत टीका सहिता (हेमकल्पः)

गाहाजुअलेण जिणं, मयमोह विवज्जिअं जियकषायं ॥ थोसामि तिसंघाएण तिण्णसंगं महावीरं ॥ १ ॥
सुकुमाल धीर सोमा,रक्त किसण पंडुरा सिरि निकेया ॥ सीअं कुस गहभीरू,जलथलनह मंडणा तिन्नि॥ २ ॥
न चयंति वीरलीलं हाउं जेइ सुरहिमत्त पडिपुन्ना ॥ पंकय गइंद चंदा, लोअण चक्कम्मिय मुहाणं ॥ ३ ॥
एवं वीरजिणिंदो, अछरगण संघ संथुऊ भयवं ॥ पालित्तय मय महिउं, दिसउ खयं सव्वदुरिआणं ॥ ४ ॥

अस्यावचूरि र्लिख्यते यथास्य अतिलघीयेस्तवेपि स्तवनंत्वं स्यादेवं । आगमेपद्यचतुष्कादारभ्य यावदष्टोतरं पद्यशतं स्तवेषु संख्या विधानात् । अथ गाथाःऽर्थ कथ्यते अस्यस्तवस्य गाथा चतुष्टयात्मकत्वेपिकथ्यते आद्यांत्यगाथाया यथा संख्यं । प्रस्तावना निगमनरूपत्वात् गाथा युगलेनैव भगवतो लोचन चंक्रमितं मुखानिवर्णयति ॥ १ ॥ सुकुमाल व्याख्या वीरतिलुप्तषष्ठी विभक्तिकं पदं प्राकृतत्वात् । श्री वीरस्य संबंधिनां लोयण लोचनैर्नेत्रैः चंक्रमणं पादविहरणात्मिका गतिरित्यर्थः मुखंचंदवदनं द्वंद्वः तेषां = लीलां शोभांसादृश्यमित्यर्थ हातुंगंडंप्राप्तुं न चयंति नशक्नुवंति ॥ शकेश्चयं तीरपारांइति सिद्ध हेमप्राकृत लक्षणात् । हातुमिति उंहाङ्गतौइत्यस्यधातोः प्रयोगाः । जेइंति पाद पूरणेइजेरा पादपूरणे । इतिप्राकृत वचनात् । केनशक्नुवंतीत्याह ॥ पंकजं कमलं महागज शशिनः इत्यत्र यथासख्यंअलंकारः पंकजं भगवन्नेत्रयो लीलां हातुंनशक्तं तस्मादप्यनंतरामणीयेनेत्रे गजेंद्रश्चंक्रमितलीलांगंतुंमशक्तिः

गजेंद्र गतितोप्यनंत प्रकर्ष शालित्वाद्भगवद्गते चंद्रस्तु मुखलीलांगतुंन शक्तः । तस्मादप्यात्यन्तिक गुणोपेतत्वाद्भगद्वदनस्य पंकजादयः किं. वि. सुकु. तत्र सुकुमारं कोमलं प्रकृत्यामृदुलं पंकजं धीरोनिष्प्रकंप शौंडीर्य युक्तत्वात् गजेंद्र इव धीरः सौम्यो नेत्राल्हादकारी चंद्रोपि स्वभावात्ताप निर्वाणाय प्रवणत्वात्सौम्य पुनः किं. वि. ते रक्तपंकजं हि कुमुदोत्पलादि विशेषनिर्देशं विना कविसमयरक्तमेवं वर्ण्यते । नागेंद्रोहि प्रायकृष्ण एवस्यात् चंद्रेपांडुरएवपुनः त्रये किं. वि. सिरिनि, श्रीलक्ष्मीर्देवता तस्या निकेता निवासाः। लक्ष्मीर्हि पंकजे गजे चंद्रेच वसतौ इतिरुढिः तथा चं लक्ष्मीस्तवे । गजे शंखे मधौ छत्रे चंद्रे पद्मे जिनालये मौक्तिके विभ्रमेवर्णे या नित्यंपरमेश्वरी पुनः किं. वि. ते सायंकु शीतं कुशोग्रहश्च तेभ्योभीरव का तारः। पंकजं हि तुषारेण दह्यते इति शीत भीरु गजेंद्र अंकुशतोदनाद्भीरुश्चंद्रग्रहा सामर्थ्यात राहुतो भीरुपुनः किं विशिष्टं जलथलं जलथलंच नभश्चेतानि मंडयन्त्यलं कुर्वंतीत्येवंशीलांजलथल, मंडनाःतिन्नित्रयश्च संख्या पुनः किं. वि. सुरभि पंकजं सुगंधि गजेंद्रः मत्तंउन्मदित्सुः चंद्रश्चप्रतिपूर्णं संपूर्ण मंडलस्यैवहि मुखं नौपम्यं ग्रह भीरुत्वं युज्यते एवं प्रकारा नैसर्गिकौपाधिक गुणविशिष्टापिन शक्त्या इतिगाथार्थः अथ चतुर्थ गाथाया स्तुतं निगमयनं प्रणिधान माद्रश एकं पूर्वोक्त प्रकारेणं जिनारागादिजे-तृत्वात् सामान्य केवलिनस्तेष्विंद्र अतिशयसमृद्धभवनात जिनेंद्र वीरश्चासौजिनेंद्रस्य । अप्सरसो देवांगणा गणयंति भोगार्हत्वात् बेहुमन्यतेअप्सरोगणा देवास्तेच संघश्चतुवर्ण श्रमण संघस्ताभ्यां । संस्तुतः स्तवकर्तुरपि संघांतर्गतत्वान्मयाच संस्तुत इति गम्यते भगवान ऐश्वर्यस्य सम । षड्विध भगयुक्तः पालि पालयंति रक्षंतीति पालिनः पालकास्तेषां पालित्रयं । ततोर्ध्व लोकपाला इंद्रास्तिर्यकलोकपाला

नरेंद्र व्यतरेंद्र ज्योतिष्किंद्राः अधोलोकेंद्रा भवनपतींद्रा इत्यनेन पालित्रयेणं कत्रांमदेनकरणभूतेन हर्षये मोदवन्मद् । इत्यंमरकोष वचनात् हर्षेण कृत्वामहित पूजितः सर्वं दुरितानां दारिद्रां रोगजरादिनां क्षयंदिशतु ॥ ४ ॥ इति द्वाद्यगाथार्थमाह गाथा युगलेन मात्रा छंदो विशेष, रुपक, द्वयेन जिनरागादिजेतारं मद्यमोह मद्यपान जनितो विकारो मदाः क्षीवतां मदः इवमदाः पारवश्यत्वात मदश्चासौ मोहस्य मोहनीय कर्मच वि मदमोहं । जंहन मद्यपामूढो लाए पुरिसोयं रत्तुसो होई तह मोहेण विमूढ जीवोविपंरद्ध सोहाः ॥ इति तेन वर्जित मदषष्ट स्यादहंकारत्वे व्याख्याय माने जितकषायमित्यनेन सहा पौनरुक्त स्यात् । कषायाणां मोहांतर्गतसेविष्टमस्य गुणपादानं संसारकारणेषु प्राधान्यख्यापनार्थं = त्रिसंघातेन सम्यक दर्शन चरित्र रूपरत्नमीलकेन साधकं तामनतर्णि संगर्तीत्यर्थ संगः कर्म्मना कर्म संबंध रूपः संयोगिनं तंअशरीर मित्यर्थ अथवा त्रिसंघातेन स्तोष्ये इति योज्यं । त्रणं तत्रत्रयाणं वक्षमानं लोचनादि वर्ण वसूनां संघातः तेन = अथात्र स्वर्ण सिद्धि द्विप्रकारेणं व्याख्या ॥ तिसृनां औषधीनां रक्त दुग्धिका सोमवल्ली वहुफलीनी संघातेन समवायेन थोसामि त्रिं स्वेदन मुखोदूधादनं जारणादिविधिं विधास्यामि । तत्रं स्वेदनं गोमहिष्याअजानरखरमूत्रैः कांजिकसहितैः दोलायंत्रेण जारणं बिडनिष्पादनेन गोरोचना स्फटिकी नवसागरं गंधकहरितालस्य सौभाग्यं रूपं औषधषट्कचूर्णं समासं अजापित्तके निक्षिप्य मासामेकं चूर्णं उपरिधार्य इत्थं पिंडं निष्पाद्यमुखमाच्छाद्यते । तद्रव्यं कृष्णमभ्रमेकपत्रं कृत्वाअयः वारलालमध्ये प्रहराष्टकं निक्षिप्य काणकंदलैर्दुर्वान् सह वस्त्रे गाल्यात् द्रव्यरूपं स्थाविवर्जित रसस्याहि त्रयो दोषा मलं शिखीविषंचेति । ततो मद्यमोह विवाज्जियं इतिअनेनमलाविषलक्षण दोषद्वय वर्जितत्वम् उक्त्वा संप्रति दहनदोषानिरासार्थं विशेषणमाहा जियकसायंति जितः स्यात्मनि मलीनः कृतः

कषाय ततत्रिफलाख्यायेन सतथातंअनेनेंदमुक्तं भवति । ततत्रिफलायां तस्य शिखि दोषोऽपनीतं इति ॥ तथाच रस ग्रंथ मल शिखी विषनामानो रसस्य नैसर्गिकाच योदोषां गृहकन्या हरति मलं त्रिफलाग्नि चित्रक सुविषं । इति । थोसामिस्तंभयिष्यामि केन कृत्वा त्रिसंघातेन सिताभ्रकंतालकं तारयतेषां त्रयाणं संधातेन योगेन्येत्येकेऽन्ये तुव्याचक्षऽते । दुग्धिकादिनास्वरसंसमर्थ्येदद्यात् । औषधीनां शुष्कत्वे तु तासांकाथकृत्वातैः संनिक्षिपेत । अत्रच रक्त दुग्धिकांसोमवल्लीं बहुफलीनां अन्यतमयापिकार्यं सिध्यति तथापितिस्त्रोग्राह्या । इत्याम्नाय पुनकथं भूतं जिनं । पारदं तीर्णं संगमृत सत्षद्गुण संयोगातीर्णस्य संप्रदायो गुरु मुखात् श्रोतव्य एतावताश्वेतविधिर्दर्शिता । अधुनापीत विधिमाह महावीर म इति हेमभाक्षिकं हा इति हाटकं वी इति कृष्नाभ्रक र इति रसः । तं स्तोस्यामि शेषा औषधयः समानाएव । इति प्रथमगाथार्थ । सुकुमालं इतिनाइणि धीरं इतिनाइं । सोमांइति सोमवल्ली त्रयं सोमावाकुचिरत्त इति रक्तदुग्धिकां कसिण इति कृष्णा बहुफलिकांचनिका पंडुरां इति देवदालीं शि इति शृंगिक विषरिइति लघु रींगिंणीनिके या इतिकेतकिं तन्नियासः । व्याख्याइति लांगुलिका कुसगह इति अहिखरा बीजानि । अपामार्ग बीजानि वा भीरु इति लज्जालुका जल मंडनिका मंडूक ब्राम्ही स्थलमंडनिका अंबावनी अंबरंगेरीं नभौ मंडनिका सुनालीं आकाश वल्ली वेत्येके एतास्तिस्त्र औषधयः औषधीनां बहुत्वेपि वित्रित्ति अभिधानं मंडनं षष्टयोः जनासाम्यात् इति द्वितीय गाथार्थ ॥ २ ॥ इदानीं पाचनक्रामणोपाटनविधिमाह नचयंति वीरो अग्निस्तस्यलीलांऽग्निरूपतां हाउंहातुंनशक्नुवंति भास्वर कार्त्तस्वर रूपत्वात् केते पंकयंगइदचंदा पंकय इति गगनमभ्रक मित्यर्थः गइंद इति मृतनागं चंदइति हेमत्रितयमपिवा येतेच पंकजादयः कीदृशाः संते

गाहाजुअल स्तुतिः

वीर लीलां नत्यजंतीत्याह । सुरहिमत्त पडिपुन्ना सुरभी मात्रा प्रतिपूर्णा सुरभिर्हेम्नि चंपक जाती फलें मात्रमं भोदे रम्ये चैत्र वसंतयो सुगंधौ गविसल्लका मित्यानेकार्थ वचनात् । सुरभि रसगंधा नुसारितया रम्याथा मात्रा परिमाण नियतिस्तयो प्रतिपूर्णाः । समग्राय व्यक्तमात्रा उल्लंघने हीनसिद्धिरत सुरभि मात्रा प्रतिपूर्णा इति । कषांकार्याणांस्तेषांसंपादयित्रीया मात्रातः आह । लोयणचकम्मियमुद्दाणाति लोयाण इति रलयो रैक्यात । रोचनं बध इत्यर्थः । चंकम्मियइति क्रामणं तुबुधरिसव्वगंमहिला मयटंकणेण कयलेवं सव्वदुहे सुकमणं निद्दीट्ठंबीयरागेण सुहंइति उदघाटनं श्वेतेना गोत्तरणपीते पुटदाणं यदुक्तं सूत संगितायां उद्धा-टनेमपुटानान्य क्रामणे कांतमिच्छति । नश्रृत्वाइंजकाकश्चिन्न माक्षीकान्प्रकाशक ॥ इत्यत्राप्युक्तं तारिहिंतारु सुवन्नु सुवन्निइं सूतुरेनदुवशइंअन्निइ । कामणवेह उघाडणनाइं हर्ष केरणु होइ रसराइं । इति तृतीय गाथार्थ अत्र निगमयन्नाह एवं पूर्व प्रकारेण वीस्तुरसेंद्ररसज्ञः इछअ = अम्लवर्गः छ = क्षारवर्गा मूत्रलवाणादि रे = रसवर्गः एषां त्रय रुपोगणतस्य संघः समवायस्तेनसंपरिचितः संस्तुत्य स्तांभितः भगवानैश्वर्यात्पूज्यः पालिण्यादलिप्तोरस विद्यासिद्धः सुरि तस्यमतेनाभिप्रायेण मठितः अणसेहतुनवरलोन निम्मलो होई मद्रूणारहिउ ॥ सोरण रहिउ समरइ कामेतुनेयकमई लोहेसु इत्यादि युकत्या परिकर्मंतो दिशतुक्षयं सर्वे दारिद्र्यं रोगजरादिनां पाठांतरे ॥ पादलिप्तस्यमत्याग्रथितः चतुर्थ गाथार्थः ॥ ४ ॥

" इत्थं स्तवरूपतयालवत सितपीतासिद्धिरूपतया ॥ श्रीपादलिप्तराचिते रचिता वीरस्तवे मयावृत्तिः ॥

इति श्री जिन प्रभसूरिभिः संवत १३८० वर्षे कृतायाः श्री वीरस्तववृत्तेः संक्षिप्यावचूरिः ग्रंथाग्रः ९० श्री थिराद्रपद्रेसानरपतिवाचनार्थ श्रीजिनप्रभसूरिणा लेखि । स्वपरोपकाराय शुभंभवतु